INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY ADVANCED RESEARCH TRENDS
ISSN : 2349-7408
VOLUME II, ISSUE 2(1) JULY 2016

# व्यपदेशिवदेकस्मिन्

**GANGAVARAPU BALARAMA KRISHNA**
Research Scholar, Dept. of Sanskrit, SCSVMV University,
Enathur, Kanchipuram – 631561

तद्धितप्रकरणे **अत इञ्**[1] (४-१-९५) सूत्रं श्रूयते । अत्र **ङ्याप्प्रातिकदिकात्**[2] (४-१-१) इति सूत्रमधिक्रियते। प्रातिपदिकस्य विशेषणं 'अतः' इति । **तेन येन विधिस्तदन्तस्य**[3] (१-१-७२) इति सूत्रानुसारं तदन्तविधिः प्रवर्तते। तथा च अदन्तात् प्रातिपदिकात् अपत्यार्थे 'इञ्' प्रत्ययः प्रवर्तते इति सिद्ध्यति। उदा – दाक्षिः। एवं स्थिते वासुदेववाचकात् अ इत्यस्मात् इञ् प्रत्ययः इष्टः, किन्तु केवलस्य अकारस्य अकारान्तत्वाभावेन अयं प्रत्ययः न प्राप्नोतीति हेतोः तत्सिद्ध्यर्थं **व्यपदेशिवदेकस्मिन्**[4] इति परिभाषा समारब्धा। एकस्मिन् = असहायेऽपि मुख्यकार्याणि प्रवर्तन्ते इति तदर्थः। अतः अस्याः परिभाषायाः आश्रयेणन 'अ' इति प्रातिपदकात् 'इञ्' प्रत्ययः सिद्ध्यत्येव। अत्र 'एकस्मिन्' इत्युक्त्या सभासन्नयने भवः इत्यर्थे **वृद्धाच्छः**[5] (४-२-११४) इति 'छ' प्रत्ययः, दरिद्रा धातोः **एरच्**[5] (३-३-५६) इति सूत्रेण 'अच्' प्रत्ययश्च न प्रवर्तते। 'एकस्मिन्' इत्यस्य अभावे तु अत्र दोषः तदवस्थ एव इत्याशयेन 'अन्यथा सभासन्नयने' इत्यादिः पङ्क्तिः नागेशेन विलिखिता[5]।

**अत्र गूढार्थदीपिकाकाराः**[8]

नागेशपङ्क्तौ अन्यथा इति प्रतीकस्य 'एकस्मिन् इत्यस्य अभावे' इति व्याख्यां विधाय तदग्रे अयं भावः इत्यादिना नागेशोपाध्यायस्य महान्तमाशयं विशदीचक्रुः। तद्यथा
स्वघटकत्वपूर्वत्वस्वघटकोत्तरत्वाभाववत्त्वैतत्त्रितयसम्बन्धेन
यत्किञ्चित्समुदायविशिष्टे आदिपदस्य शक्ततया भकाराकारस्य

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY ADVANCED RESEARCH TRENDS
ISSN : 2349-7408
VOLUME II, ISSUE 2(1) JULY 2016

समुदायघटक सशब्दोत्तरत्वस्यैव सत्त्वेन वस्तुतः तस्य तत्समुदायनिरूपितादित्वस्याभावेऽप्येकस्मिन्नित्यस्याभावेऽनया परिभाषया तत्र स्वघटकोत्तरत्वाभाववत्त्वरूपविशेषणस्यरोपेण तस्यापि समुदायनिरूपितादित्वलाभद्विशिष्टस्य वृद्धसंज्ञायां **वृद्धाच्छः**[9] (४-२-११४) इति छप्रत्ययापत्तिः. एवमन्तशब्दस्य स्वघटकत्वस्वघटकोत्तरत्वस्वघटकपूर्वत्वाभाववत्त्वैतत्त्रियसम्बन्धेन यत्किञ्चित्समुदायविशिष्टे शक्ततया दरिद्राताविकारस्य द्राशब्दनिरूपितपूर्वत्वस्यैव सत्त्वेन वस्तुतस्तस्य तत्समुदायनिरूपितान्तत्वस्याभावेऽप्यनया परिभाषया स्वघटकपूर्वत्वाभाववत्त्व-रूपविशेषणस्यारोपेण तस्यापि समुदायनिरूपितान्तत्वलाभाद्विशिष्टादिवर्णान्तलक्षणोऽच् स्यात्। एकस्मिन्नित्यस्य सत्त्वे न तु मुख्यादित्वान्तत्वतोस्सकाराद्राशब्दघटकाकारयोस्सत्त्वेन भाकाराकारस्य रेफेकारस्य च निरुक्तदिशाऽसहायत्वाभावात्प्रकृतपरिभाषाया अप्रवृत्तौ न दोष इति इत्थमत्र अन्यथा इति प्रतीकस्य विवरणं सुष्ठु विहितं शास्त्रिपादैः।

## परिभाषायामेकशब्दस्य संख्यावाचित्वनिरूपणम्, तन्निरासश्च

अत्र परिभाषायाम् एकशब्दः असहायवाची, न तु संख्यावाची इति अवश्यमभ्युपेयम्।

### अत्र चन्द्रिकाकृतः[10]

वाक्यार्थचन्द्रिकाकाराः भागवत हरिशास्त्रिणस्तु केचित्तु इत्यादिना अत्र परिभाषायाम् एक शब्दं संख्यापरत्वेन अभुपगच्छन्ति। तथा हि – केचित्तु परस्परनिरूप्यनिरूपकभावापन्नयो-र्विभिन्नाधिष्ठानावस्थितिस्वभावयोर्धर्मयोरेकस्मिन्धर्मिण्यारोपेणावस्थानमनया परिभाषया बोध्यते,

लोकन्यायेनाप्येतावानेवाश्रयणीयोऽर्थः सामान्ये पक्षपातात्। नत्वसहायपरत्वमतिदेशस्य। तस्मात्परिभाषायामेकग्रहणं संख्यापरमेव। इत्थञ्च स्वस्यैव स्वनिरूपितमवयवत्वमवयवित्वञ्चेतीयायेत्यादौ द्वित्वमाभ्यामित्यादौ दीर्घश्च सिद्धः। यद्येवं दरिद्रातविकारस्य स्वनिरूपितमतवत्वं स्यात्। अस्तु , तत्तु न विशिष्टधातुनिरूपितम्। तन्निरूपितमेव ह्यचप्रत्ययविधावुपयोक्ष्यते। सभासन्नयने भाकाराकारस्य स्वनिरपितादित्वे सत्यपि तत्तद्विध्युद्देश्यतापन्नसमुदायनिरूपितादित्वस्य दुर्लभतया न वृद्धसंज्ञाप्रयुक्तछप्रत्ययादिप्रसङ्गः। एवञ्च समुदायसद्भावेऽपीकारस्य स्वनिरूपितावयवत्वनिमित्तकैकाच्त्ववव्यवहारे बाधकाभावेन निजौ चत्वार एकाच इति भाष्यं[11] स्वरसत उपपद्यत इति तदेवात्रार्थे प्रमाणम्। एकशब्दस्यासहायार्थकत्वाभावादेव च प्रयोजनविचारोऽपि भाष्यकृता न कृत इति विपश्चितां विचारणीयोऽयमर्थ इत्याहुः – इति वदन्ति।

**अत्र गूढार्थदीपिकाकारः**[12]

नागेशगूढार्थदीपिकाकारास्तु अत्रेदं विचार्यते इत्यादिना अत्र परिभाषायाम् एक शब्दस्य असहायवाचित्वमेव सत्प्रमाणं निरूपयन्ति। तथा हि – **आद्यन्तवदेकस्मिन्**[13] (१-१-२१) इति सूत्रे एकस्मिन्नित्यस्यासहायार्थकतायाः कैयटहरदत्तादिभिस्सर्वैरपि प्राचीनैर्वाचीनैश्च व्याख्यातृभिरुक्तत्वेनेयायेत्यादिबहुलक्ष्यसंग्रहाय तत्सूत्रघटकाद्यन्तवदित्यस्य स्थाने व्यपदेशिवदिति पदं निवेश्य भगवता पठितेऽत्र न्यायेऽप्येकस्मिन्नित्यस्य तैस्तथैव व्याख्यातत्वे तद्विरुद्धतया तस्य संख्यापरत्वेन व्याख्यानमनुचितम्। ननु बाधे दृढेऽन्यसाम्यात्किंदृढेऽन्यदपि बाध्यतामिति न्यायेन निजौ चत्वार एकचः इति भाष्यविरोधात्सर्वेऽपि ते ग्रन्थाश्चित्या एवेति चेन्मैवम्। अत्रैकस्मिन्नित्यस्य सभासन्नयने भव इत्यर्थे भाकारकारकस्यानेन सूत्रेण न्यायेन वाऽदित्वे तस्य वृद्धत्वेन प्राप्तछप्रत्ययाभावार्थं,

दरिद्रातेरिकारस्यान्तत्वे प्राप्तेवर्णान्तलक्षणाच्प्रत्ययाभावार्थं च कृतत्वेन, तस्य संख्यापरत्वे, निरुक्तस्थले बहुमध्यस्थयोरप्याकारयोरितरेषां बुद्धिविषयत्वाभावे शते पञ्चाशन्यायेनाकत्वस्य सत्त्वात्कृतेऽपि तस्मिंस्तत्र तद्दोषवारणासम्भवत्तस्याव्यावर्तक्तवापत्तेः।न च **वृद्धिर्यस्याचामादिस्तद्वृद्धम्**[14] (१-१-७३) इत्यत्रादिग्रहणस्यापीदमेव व्यावर्त्यमिति तत्सामर्थ्यादनितिदिष्टत्ववदृद्धेरेव ग्रहणेन न सभासन्नयने भव इत्यत्र दोष इति वाच्यम्। तथा सति जानातीति ज्ञा, ब्रह्मणी, तस्या इयमित्यर्थे **वृद्धच्छः**[15] **(४-२-११४)** इति छप्रत्ययानापत्तेः। तत्राकारस्यानतिदिष्टादित्वाभावेन विशिष्टस्य वृद्धत्वाभावात्। किञ्च लोके बहुपुत्रसत्त्वे शते पञ्चाशन्यायेनैकस्मिन्नेकत्वसंख्यायाः सत्त्वेपि तत्र ज्येष्ठत्वकनिष्ठत्वमध्यमत्वादिव्यवहार स्यादृष्टतया केवलैकपुत्रसत्त्व एव तादृशव्यवहारस्य दर्शनेन चात्रैकस्मिन्नित्यस्य संख्यापरत्वे लोकन्यायवैगुण्यमपि स्यात्। किञ्च नेनिजतीत्यत्र निजशब्दोऽप्येकाच्, इज्शब्दोऽप्येकाच् इकारोप्येकाच्, निशब्दोऽप्येकाजिति **एकाचो द्वे प्रथमस्य**[16] (६-१-१) इति सूत्रे भाष्ये-[17] इकारोऽपीति प्रतीकमुपादाय अर्थवता व्यपदेशिवद्भावः इत्यनाश्रित्य इकारोऽपीत्युक्तम् इति कैयटेनोक्तत्वात्तदवलम्बेनैकस्मिन्नित्यस्य संख्यापरताया आकरग्रन्थविरुद्धत्वात्। किञ्चैकस्मिन्नित्यस्य भगवता प्रयोजनविचाराकरणमात्रं न तस्यासहायार्थकत्वाभावं साधयितुमीष्टे। असहायार्थकत्व एव प्रयोजनविचार आवश्यकोऽन्यत्र नेति वक्तु मशक्यत्वात्। प्रत्युक्तं संख्यापरत्व एव निरुक्तरीत्या तस्याव्यावर्तकत्वशङ्कायाः सत्त्वेन तत्रैव शङ्कासमाधानयोरावश्यकतया तदकरणासहयपरत्वमेवैकग्रहणस्य लभ्यत इति तदस्माकमेवानुकूलम्। किञ्च मुख्यव्यवहारहेत्वाभावादविद्यमानमुख्यव्यवहारे मुख्यव्यवहारत्वकार्यमेवानेनातिदिश्यते। सभासन्नयने सकाराकारे समुदायनिरूपितं मुख्यमादित्वं विद्यते। भाकाराकारे तु न । अतोऽत्र न्याये एकस्मिन्नित्यस्याभावे तस्य संख्यापरत्वे वा भाकाराकारे

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY ADVANCED RESEARCH TRENDS
ISSN : 2349-7408
VOLUME II, ISSUE 2(1) JULY 2016

समुदायनिरूपितात्वास्यानया परिभाषयाऽतिदेशाद्विशिष्टस्य वृद्धसंज्ञायां ततो भवार्थे **वृद्धाच्छः**[18] (४-२-११४) इति छप्रत्यययापत्तिः। स्वस्मिन् स्वनिरूपितमेवावयवत्वमवयवित्वं चानया परिभाषयातिदिश्यत इति तु न परिभाषाक्षरलभ्यः। किञ्च तथाऽभ्युपगमेऽपि भाकाराकारेऽच्समुदायत्वततदादित्वयोर नयातिदेशे वृद्धिसंज्ञाकाद्यवयवकाच्समुदायत्वस्य आकारेऽतिदेशतस्सिद्धतया तादृशसमुदायघटितत्वस्य सभासन्नयने सत्त्वेन वृद्धिसंज्ञकाद्यवयवकाच्समुदायघटितस्य विधीयमानाया वृद्धसंज्ञायाः प्रवृत्त्या छप्रत्ययो दुर्वार एव। किञ्च परस्परनिरूप्यनिरूपकभावापन्नयोर्भिन्नाधिष्ठानावस्थितिस्वभावयोर्ध र्मयोरेकस्मिन्धर्मिण्या रोपेणावस्थानमनया परिभाषया बोध्यत इति तु न युक्तम्। तिङ्त्वादेः प्रकृत्या निरूप्यनिरूपकभावस्यासत्त्वेऽपि प्रत्ययत्वस्य प्रकृत्या तत्सत्त्वेन सर्वत्र प्रकृतौ प्रत्ययान्तत्वातिदेशप्रवृत्त्या धातुमात्राद्भावे स्त्रियामप्रत्ययादित्यकारप्रत्ययपत्तेः। तत्र प्रत्ययादित्यनेनानतिदिष्टप्रत्ययान्तस्यैव ग्रहणमित्यर्थकल्पने त्वाचारक्विबन्तेभ्यस्तदापत्तिर्दोषः सङ्कोचस्यातिदेशविशेषविषयकत्वकल्पने तु क्लेशः। एवं सर्वेषां प्रातिपदिकानामुक्तरीत्या प्रत्ययान्तत्वेन **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**[19] (१-२-४५) सूत्रस्यैव निर्विषययत्वप्रसङ्गः। सूत्रसामर्थ्येनार्थान्तरकल्पनायां तु क्लेशः। अतो मूलोक्तदिशौकस्मिन्नित्यस्यासहायार्थकत्व मेवोचितमिति सुधियो विभावयन्तु इति। अनया रीत्याऽत्र परिभाषामेकशब्दस्य संख्यावाचित्वं निराकृतम् ।

तस्मात् परिभाषायाम् एकशब्दः असहायवाची, न तु संख्यावाचीति निष्कर्षः।

## References:

पाणिनी अष्टाध्यायी
पाणिनी अष्टाध्यायी
पाणिनी अष्टाध्यायी
परिभाषेन्दुशेखरः(नागेशगूढार्थदीपिकासहितः)परि.सं-३०,पृ-१७१
पाणिनी अष्टाध्यायी
पाणिनी अष्टाध्यायी
परिभाषेन्दुशेखरः(नागेशगूढार्थदीपिकासहितः)पृ.१७२,१७३
परिभाषेन्दुशेखरः(नागेशगूढार्थदीपिकासहितः)पृ.१७३
पाणिनी अष्टाध्यायी
परिभाषेन्दुशेखरः (वाक्यार्थचन्द्रिकासहितः) पृ.१९८,१९९
व्याकरणमहाभाष्यम् (षष्ठम भागः)पृ.४
परिभाषेन्दुशेखरः(नागेशगूढार्थदीपिकासहितः)पृ.१८०
पाणिनी अष्टाध्यायी
पाणिनी अष्टाध्यायी
पाणिनी अष्टाध्यायी
पाणिनी अष्टाध्यायी
व्याकरणमहाभाष्यम्(षष्ठम भागः)पृ.४
पाणिनी अष्टाध्यायी
पाणिनी अष्टाध्यायी